# नरबलिः
**narabaliH**[1]

न चञ्चलं मानसं मे न भयं समराङ्कणे।
म्रिये तव कृते देवि! मङ्गळादर्शरूपिणि!॥ १॥

शान्तितीर्थनिवासिन्यस्तारा दूरात् समूचिरे।
दृश्यते मन्दिरं तस्मिन् विपिने हरिनीलवत ॥ २॥

चकास्ति परितः शान्तवीचिका चित्तपद्मिनी।
विकसत्स्वर्णकमलं विभाति वनमन्दिरम्॥ ३॥

उषःसन्ध्यापूज्यमानध्वजमण्डपसीमनि।
समाहितमतिः शेते सटावान् कोऽपि केसरी॥ ४॥

उदीच्यां दिशि यो देवदारुच्छायामुपाश्रितः।
अवाच्यपुण्यस्मरणरोमन्थकपरायणः॥ ५॥

तारानाथकलापीडविहायससुवाहनम्।
शेते श्वेतमनोहारिककुद्मान् स हिमालयः॥ ६॥ युग्मकम्॥

घनीभूतसितज्योत्स्नास्वेतास्वमरभूमिषु।
नृत्यन्त्यहो! नित्यवीणानिनादमधुवीचयः॥ ७॥

अत्रैव जाता हिमवद्वने मर्त्यमहौषधिः।
अत्रैव वर्धितो विश्वसाहितीरत्नशेवधिः॥ ८॥

भजमाना भवत्यत्र पुण्यमन्दिरसीमसु।
वनज्योत्स्नाबर्हियूथनृत्तसुन्दरभूमिषु॥ ९॥

गङ्गानदीति प्राचीनप्रियनामाङ्किता मुदा।
विश्वप्रणयसङ्गीतालापिनी वनकन्यका॥ १०॥ युग्मकम्॥

सितासैकतकाभोगसुभगायां सदाप्यहो।
दक्षिणस्यां वीथिकायां गर्जन्त्युच्चैर्मतङ्गजाः॥ ११॥

आयान्ति नित्यं पर्यायेणाराद्धमृतुकन्यकाः।
सौरभ्यवाहकाश्चात्र मारुतास्तीर्थयात्रिकाः॥ १२॥

आयान्ति माल्यालङ्कारान् द्रष्टुं काल्यकुमारिकाः।
मल्लीकुसुमतालोद्यत्कराः शारदरात्रयः॥ १३॥

अङ्गुल्या निर्दिशन्त्यग्रे तोयदास्तीर्थचारिणः।
हिमदुर्गमिदं त्वार्षभारतस्य तपोवनम्॥ १४॥

[1] Orginal poem in Malayalam by P.Kunhiraman Nair. Translated into Sanskrit by N.V.P.Unithiri, Prof. of Sanskrit, University of Calicut, Kerala.

नवरत्नमयी कृत्स्ना श्रीगर्भगृहभित्तिका।
नीलं नभश्चुम्बतीव लसत्कुम्भकतल्लजाः॥ १५॥

अभौमसर्गशिल्पोद्यत्संस्काराग्रनवाङ्गुलिः।
रागालापं करोत्यत्र शिलासु सकलास्वपि॥ १६॥

द्वारस्तम्भेषु चान्तःस्थकृष्णपाषाणभित्तिषु।
दृश्यते नाटकं दीपे शान्तेऽप्यव्यक्तसुन्दरम्॥ १७॥

वामे हस्ते कार्मुकं च दक्षिणे च शितान् शरान्।
धृत्वा विराजते मानुषाकारो नीलभास्करः॥ १८॥

सीतां श्रीभूमिजां हृत्वा स्थितो यः कामकिङ्करः।
छित्वा तस्य शिरांस्यत्र तेजोरूपी विभात्यहो॥ १९॥

भेत्तुं यो वञ्चकैः सैन्यैः सौभ्रात्रस्य हृदन्तरम्।
ऐच्छदेतस्य लोभस्य कथामाह शिला सदा॥ २०॥

व्यामोहविषवातेन मूर्छितं मर्त्यपौरुषम्।
केनचिच्छङ्खनादेन सुप्रबुद्धं च चित्रितम्॥ २१॥

अज्ञातसत्यमूलं याः सदा सर्वात्मना श्रिताः।
धर्मध्वजपताकास्ताः सहस्रं चित्रितास्त्विह॥ २२॥

दुष्टेन नाशितं येन सुन्दरं ग्रामगोकुलम्।
कंसं तं हतवान् यः स बालोऽत्रालेखितः परम्॥ २३॥

चित्रमत्रास्ति यत्रैषा महर्षीणां परम्परा।
सन्त्यक्तविषयस्पर्शा स्वदते परमां मुदम्॥ २४॥

वर्तते मुनिरप्यत्र कळवीणास्वनोत्करान्।
प्रसारयति योऽसक्तो रसयन् भवनाटकम्॥ २५॥

विवर्णतां भजन्त्येताः सततं प्रेक्षकैर्विना।
प्राचीनमन्दिरस्यास्य विचित्राश्चित्रभूमयः॥ २६॥

भोजयन्ति स्म याः पूर्वं मिष्टान्नं पथिकान् मुदा।
दृश्यन्ते ह्यग्रशालास्ता लूतावल्मीकसंवृताः॥ २७॥

निहतानि च पद्मानि भग्नाः सोपानपङ्क्तयः।
अधुना पङ्कगर्तो यत् पुण्यतीर्थमिदं सरः॥ २८॥

आपादयन्ति मलिनं विषाक्तं कुर्वते जलम्।
न कश्चित् पङ्कमुद्धर्तुं प्रसारयति हा! करम्॥ २९॥

कांस्यदीपास्तत्र तत्र चिरं स्नेहविवर्जिताः।
वर्तन्ते श्यामिकां प्राप्ताः शोकमूका विवर्णकाः॥ ३०॥

नामसङ्कीर्तनं नास्ति न चेह स्तोत्रगीतयः।
निवृत्ता किल सेवाया वेदमन्त्रपरम्परा॥ ३१॥

किञ्चित् प्रजल्पतीवात्र भजनाय समागतः।
पटहः शुष्कचर्मा च कृशश्च पलिताकुलः॥ ३२॥

सम्भूयैते क्षेत्रभारवाहिनो घोरमूषिकाः।
खनन्ति स्वर्णनिक्षेपभाण्डागारोग्रभित्तिकाः॥ ३३॥

अलब्धपूजा नैवेद्यरहिता नष्टवैभवा।
वरदानाक्षमा देवी बिम्बमात्रात्र वर्तते॥ ३४॥

पूर्वे शशंसिरे देवीमेतां स्वकुलदेवताम्।
उपासांचक्रिरे चैतत्पदं ते प्रपितामहाः॥ ३५॥

सर्वस्वमर्पयामासुस्ते देव्याः पदयोस्तदा।
सर्वत्राद्य तु दृश्यन्ते वञ्चका धनलोभिनः॥ ३६॥

वितीर्य सम्पदं सौख्यकल्पवल्ली ननर्त सा।
प्रसन्नवदना देवी पुरैषा परदेवता॥ ३७॥

विद्याप्रदीप्तिं प्रददौ तदा याऽऽक्षररूपिणी।
शिलीभूतैव सेदानीं वीणापाणी सरस्वती॥ ३८॥

शत्रुभीतिकरं वीरपौरुषं धारयन्त्यभूत्।
या सा शिलैव जाताद्य विवर्णा सिंहवाहना॥ ३९॥

वितीर्य पुष्पान् वासन्तकाल्यकन्या गतास्तथा।
शरत्सन्ध्यास्तत्यजुः स्वं माल्यनिर्मितिकर्म च॥ ४०॥

दृश्यते विरळत्वेन कालवर्षौपहारिकम्।
सैनिकोऽभूद् देवपूजां हित्वासौ मन्दमारुतः॥ ४१॥

फणान् विसार्यागतानि रुषान्धानि तमांस्यपि।
चरन्ति शत्रवो यत्र प्राप्ता सा काळरात्रिका॥ ४२॥

क्षोभयन्ति वनं शब्दाः प्रज्वलन्त्युग्रमग्नयः।
जिह्वाभ्यो विश्वकद्रूणां प्रवहन्त्यस्रबिन्दवः॥ ४३॥

हिमानिलैरप्याहन्यमानाश्चञ्चलतां विना।
रक्षाभटास्ते तिष्ठन्ति देवदारुमहीरुहाः॥ ४४॥

अनुप्रविविशुः खड्गान् धृत्वा वैदेश्यसैनिकाः।
श्रूयते दूरतो घूकवाशितं मृत्युसूचकम्॥ ४५॥

दीर्घीभवन्ति दुःखानां तमश्छायाश्च सर्वतः।
भूयोऽप्यायान्ति ते दग्धुमिदं पावनमन्दिरम्॥ ४६॥

अहो! रक्षासैनिकोऽस्मि सदा निद्रापरायणः।
सुवर्णमन्दिरस्यास्य गोपुरस्यास्मि रक्षकः॥ ४७॥

छलेन प्राप्तवित्तोऽसौ शासकः क्व गतः खलः।
शेते देवागाररम्यप्रासादे किं मदालसः॥ ४८॥

तन्नियुक्ताश्च पुरुषा धनमर्जन्ति वञ्चनैः।
रक्षाभटोऽस्म्यहं किन्तु हस्तौ मे विगतायुधौ॥ ४९॥

गर्जन्ति परितो वर्षमेघयुद्धविमानकाः।
स्फुटन्ति विद्वेषाग्नीनां गोळ्यः सर्वासु दिक्ष्वपि॥ ५०॥

क्षेत्राङ्कणे गाढनिद्रानिमग्नाश्च किमुत्थिताः।
तटिद्वेत्रप्रहारेभ्यो भीताः कपटभक्तयः॥ ५१॥

अन्तर्न दीपस्तमसामधीशत्वं च सर्वतः।
बहिस्तु वास्तुलीलोत्थमहार्णैः सर्वमावृतम्॥ ५२॥

साभिप्रायं निरीक्षन्ते चाराद् वैदेशिकाः परम्।
आमील्य नेत्रमाहुस्ते मिथः किमपि सस्मितम्॥ ५३॥

विस्मृतं युद्धतन्त्रं मे; नष्टो युद्धकृपाणकः।
खळूरिका च जीर्णाभूद्; याचे नळिकमस्म्यहो॥ ५४॥

आपणास्यैर्मूकलक्षमाहत्येह ग्रसन्ति ये।
गणयित्वा नाणकानि स्मयन्ते वणिजस्तु ते॥ ५५॥

न चञ्चलं मानसं मे न भयं समराङ्कणे।
म्रिये तव कृते देवि! मङ्गळादर्शरूपिणि॥ ५६॥

हृदि मे दुर्गकं भित्वा प्रविष्टान् सर्वदुर्गुणान्।
युद्ध्ये नित्यं ; सद्गुणात्मक्षेत्रसंरक्षणाय च॥ ५७॥

रक्तमांसे यो जिघृक्षुस्तस्मै दत्वा तु ते पुनः।
तर्पयामि प्रपञ्चं च विश्वमङ्गळदेवते॥ ५८॥

मर्त्योऽस्म्यहं, मरिष्यामि त्वत्कृते स्नेहविग्रहे।
अन्तरात्मचिदानन्दकवितावनदेवते॥ ५९॥

पातुं जलमलब्ध्वात्र म्रियन्ते शिशवो यदा।
तदा पुष्टां भृतिं गृह्णन् वध्योऽहमधुना ध्रुवम्॥ ६०॥

निर्गृहाः पण्यरथ्यासु सोदर्यः शेरते यदा।
प्रासादनिर्मितिरतो वध्योऽहमधुना ध्रुवम्॥ ६१॥

प्राप्तो ह्यविद्याविद्यां यो विक्रीयाप्यात्मसंस्कृतिम्।
सोऽहं स्वदेहं पुष्णंस्तु हन्तव्यो मातृघातकः॥ ६२॥

लोहसारमयं चित्तं गृहाणेदं ममाम्बिके।
मामेवायुधमादाय युध्यस्वात्यन्तभीषणम्॥ ६३॥

गर्जत्यन्तर्मेघनादः कवाटं च प्रभिद्यते।
स्फुरत्येषा शूलहस्ता महिषासुरमर्दिनी॥ ६४॥

चलत्यहो कृष्णशिलामयोऽसौ शान्तविग्रहः।
उन्मीलिते ते नयने प्रकाशेते भयावहम्॥ ६५॥

ज्वलन्ति दिव्यशस्त्राणि चतुर्दशकरेष्वपि।
कपालमालिकेयं हा! हसत्युच्चैर्भयङ्करी॥ ६६॥

विस्फारितो मेघकेशो ध्वनितः शङ्खनिःस्वनः।
श्रुतः कटकशब्दश्च, जिह्वा सा रक्तलालसा॥ ६७॥

शोणाग्निर्ज्वलतीवासृग् व्याप्नोति वनभूमिषु।
संहारनृत्तं कुरुते काळिका धृतनूपुरा॥ ६८॥

कोऽयं मेघरवः? का वा विद्युद्वल्लीयमम्बिके?।
आहूतोऽस्मि त्वयेदानीं; तवाज्ञा भद्रकाळि! का? ॥ ६९॥

" पुत्ररक्तं, पुत्रमांसं;" अल, माज्ञा श्रुता मया।
शासनीयोऽहमधुना व्याजभक्तशिरोमणिः॥ ७०॥

रक्षाभटोऽहं नापश्यमद्य यावत्तु मन्दिरम्।
न चापश्यमिमं बिम्बं देव्याश्चैतन्यनिर्भरम्॥ ७१॥

नास्नासिषं नाभजं त्वां न च ते नाम कीर्तितम्।
त्वत्सोपाने न विन्यस्तं प्रसूनदळमप्यहो॥ ७२॥

न काचिदुपदा दत्ता भाण्डागारे परं मया।
न देहः पुळकाश्लिष्टो नैवार्द्रे नयने मम॥ ७३॥

शिलाचित्ते नाङ्कुरिता जनयित्रीति भावना।
जीविकायै भृतिं गृह्णन्नचित्तो जन्तुरस्म्यहम्॥ ७४॥

नाद्राक्षमन्ध एवाहं धर्मबोधप्रदीपिकाम्।
न मयोपासितं मन्त्रं मामकादर्शदेवते॥ ७५॥

केनापि विषभोज्येन चैतन्यरहिता कृता।
जिह्वा चलति मे भूयस्तव नामानि कीर्तितुम्॥ ७६॥

पुत्रेत्याह्वयमानां त्वामश्रौषं निजमातरम्।
स्वयं नरबलिं कृत्वा तुभ्यमानृण्यमश्नुवे॥ ७७॥

किमात्थ विद्युल्लतिके? किं वक्ष्यम्बुदगर्जन?।
किमब्रवीस्त्वं कठोरस्मृतिबाष्पार्द्रतारके?॥ ७८॥

तूष्णीं भवसि किं रक्तपुष्पमालिन् धराधर?।
वनेऽस्मिन्नन्धकारे किमाक्रन्दसि सुरापगे?॥ ७९॥

पश्याम्यहं त्वामेणाङ्ककले! गगनचारिणि।
समाश्लिषाद्य मां रक्तगन्धवाहिन् समीरण॥ ८०॥

सर्वाण्याशापाशनाळान्युच्छिद्य प्राक्षिपं, तथा।
इदं शिरोऽग्निकुण्डं च तप्तं च प्राणमारुतम्॥ ८१॥

छित्वाक्षिपं त्वत्पदेऽहं हृत्सुमं पाणिपादकम्।
समार्पयं शोणितं मे ददाम्युत्पाट्य चाक्षिणी॥ ८२॥

छिनद्म्यहमिमां जिह्वामसत्याभाषणोत्सुकाम्।
मद्यपानासक्तमिमं मानसं चार्पये तव॥ ८३॥

प्रसार्य केशान् नृत्य त्वं, गाय मे मृतिदेवते।
मेळनेऽस्मिन्नस्तु पुत्रहृत्स्पन्दैस्ताळवादनम्॥ ८४॥

रक्षिता वीरलक्षाणां कवचार्पयिता च यः।
करेण तेन संवाह्य जडमेतं तु जीवय॥ ८५॥

सन्नह्यतु स कल्पान्तमेघोऽस्मिंस्तव कैशिके।
नूपुरे स च संहाररणदुन्दुभिसंरवः॥ ८६॥

कौक्षेयके प्रज्ज्वलन्तु तटित्सेनाः पुनः पुनः।
चलापाङ्गे क्वथत्वत्र तप्ताग्न्युज्ज्वलसागरः॥ ८७॥

अपमानश्मशानेऽस्मिन् निर्मोहि निजमालयम्।
चलत्पुच्छं मां शुनकं वीरकेसरिणं कुरु॥ ८८॥

पुत्रेत्याह्वयमानां मामश्रौषं निजमातरम्।
स्वयं नरबलिं कृत्वा तुभ्यमानृण्यमश्नुवे॥ ८९॥

त्रुट्यन्तमेतं कङ्काळं काळ्यारुह्यातिभीषणा।
नृत्यास्यां काळरात्रौ त्वमट्टहासमदोत्कटा॥ ९०॥